# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**M.A./M.Sc. FIRST SEMESTER EXAMINATION, DECEMBER 2019**
**FIRST YEAR (BATCH 2019-21)**
**SANSKRIT**

Date : 21/12/2019
Time : 11 am – 1 pm
**Paper : IV (CC4)**
Full Marks : 50

## Unit-I

१. प्रश्न**द्वयं** समाधेयम्। [२×५]

क) मम्मटदर्शितदिशा उत्तमकाव्यस्य लक्षणमुपस्थाप्यताम्।

ख) "न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतु: न तु हेतव:" – व्याख्यायताम्।

ग) अभिहितान्वयवादान्विताभिधानवादयो: पार्थक्यं तावत् व्याख्यायताम्।

घ) "संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा" – व्याख्यायताम्।

२. यथेच्छं **पञ्च** प्रश्ना: समाधेया:। [५×१]

क) किं तावत् अधमकाव्यस्य लक्षणम्?

ख) वाचकशब्दस्य लक्षणं काव्यप्रकाशे किं लक्षितम्?

ग) "तद्वान् अपोहो वा शब्दार्थ: कैश्चित्" – इत्यत्र अपोहस्य क: अर्थ:?

घ) मम्मटकृतलक्षणे अनलंकृती पुन: क्वापि" – इत्यस्य क: अर्थ:?

ङ) कस्तावत् काव्यप्रकाशकृत्? काव्यप्रकाशग्रन्थे कति उल्लासा: सन्ति?

च) काव्यप्रकाशस्य मङ्गलाचरणं किम्?

छ) "गङ्गायां घोष:" – इत्यत्र कीदृशी लक्षणा?

ज) तात्पर्यार्थोऽपि केषुचित् – अत्र केषुचित्पदेन केषां बोध:?

झ) गौर्वाहीक इत्यत्र वाहीकपदस्य कोऽर्थ:?

ञ) उपाधि: कतिविध:? के च ते?

## Unit-II

३. यथेच्छ**मेकं** विषयमवलम्ब्य एका टीका रचनीया। [१×५]

क) नृत्यम्   ग) प्रतिमुखसन्धि:

४. **पञ्च** प्रश्ना: समाधेया:। [५×२]

क) दशरूपककारनये अस्य ग्रन्थस्य प्रयोजनं किम्?

ख) कानि रूपकाणि?

ग) आधिकारिकवस्तुन: लक्षणं किम्? उदाहरणञ्च प्रदेयम्।

घ) को नाम गर्भसन्धि:?

ङ) का नाम चूलिका?

च) का नाम प्रशस्ति:? कस्य सन्धे: अङ्गरूपेण प्रशस्ति: परिगण्यते?

छ) किं नाम आकाशभाषितम्?

ज) किं नाम जनान्तिकम्?

झ) पताकाप्रकर्यो: भेदद्वयं लिखत।

ञ) किं नाम अपवारितम्?

## Unit-III

५. यथेच्छ<u>**मेक:**</u> प्रश्न: समाधेय:। [१×१०]

क) युगजीवनमिति दृश्यकाव्यमवलम्ब्य गदाधरस्यावतारत्वसिद्धि: वर्ण्यताम्।

ख) युगजीवनमिति दृश्यकाव्यस्य प्रथमदृश्यस्य वृत्तं समासत: समुपस्थाप्यताम्।

## Unit-IV

६. यथेच्छ<u>**मेक:**</u> प्रश्न: समाधेय:। [१×१०]

क) विवेकानन्दस्य जीवने संस्कृतभाषाचर्चाया: कीदृश: प्रभाव आसीत् इति स्पष्टीक्रियताम्।

ख) स्वामिन: जीवने संस्कृतव्याकरणस्य वेदान्तस्य च प्रभाव: कीदृश आसीत् इति व्याख्यायताम्।

—————— × ——————